द्वादशः पाठः

# स्वामिनः विवेकानन्दस्य व्यथा



1893 तमस्य वर्षस्य सितम्बरमासः। स्वामी विवेकानन्दः अमेरिकादेशे आयोजिते विश्वधर्मसम्मेलने भागं गृहीतवान्। तस्य भाषणानां कीर्तिः सर्वत्र प्रसृता जाता। अमेरिकानिवासिनः ततः अत्यन्तम् आकृष्टाः जाताः।

कौचित् अमेरिकीयदम्पती स्वामिनं विवेकानन्दं स्वगृहं प्रति निमन्त्रितवन्तौ- "अस्माकं गृहे भोजनसेवनेन विश्रामस्वीकरणेन च वयम् अनुग्रहीतव्याः" इति। स्वामिवर्यः तयोः निवेदनम् अङ्गीकृतवान्। सः तत् गृहं गत्वा रात्रौ भोजनं कृतवान्।

दम्पती तस्य शयनस्य व्यवस्थाम् एकस्मिन् प्रकोष्ठे परिकल्पितवन्तौ। समग्रा व्यवस्था अत्युत्कृष्टा आसीत्। निकटस्थः प्रकोष्ठः दम्पत्योः विश्रामस्थानम् आसीत्।

अर्धरात्रे महिला कस्यापि रोदनस्वरं श्रुतवती। कस्य रोदनं स्यात् एतत् इति तया क्षणकालं न ज्ञातम्। ततः कमपि सन्देहं प्राप्तवती सा पार्श्वस्थस्य प्रकोष्ठस्य समीपं गतवती। ततः तया ज्ञातं यत् रोदनस्वरः विवेकानन्दप्रकोष्ठात् एव आयाति इति। सा झटिति पतिं जागरितवती, तेन सह विवेकानन्दस्य प्रकोष्ठं गतवती च। तत्र ताभ्यां रोदनं कुर्वन् स्वामिवर्यः दृष्टः। ताभ्यां महत् आश्चर्यं प्राप्तम्। रोदनजन्यात् अश्रुतः सम्पूर्णम् अपि उपधानम् आर्द्रं जातम् आसीत्।

"स्वामिवर्य! अस्माकं व्यवस्थायां कोऽपि दोषः वर्तते किम्? किमर्थं भवान् रोदिति? यदि व्यवस्थायां कोऽपि दोषः स्यात् तर्हि क्षन्तव्याः वयम् इति उक्तवती गृहस्वामिनी।

तयोः आगमनं दृष्ट्वा विवेकानन्दः क्षणकालं दिग्भ्रान्तः। स्वस्य रोदनं ताभ्यां दृष्टम् इत्यतः काचित् लज्जा अपि। क्षणं विरम्य रोदनं यत्नेन निगृह्य सः अवदत्– "क्षन्तव्यः अहम् एव भवद्भ्याम्। भवती अत्यन्तं मधुरं स्वादु भोजनं परिविष्टवती। सुखदायितल्पम् अपि व्यवस्थापितवती। समग्रा व्यवस्था उत्कृष्टा दोषरहिता च अस्ति एव। मम रोदनस्य कारणम् अत्रत्या व्यवस्था सर्वथा न। भोजनं कृत्वा यदा अहं तल्पे विश्रामं कुर्वन् आसं तदा मम नेत्रयोः पुरतः मम देशबान्धवानां चित्रम् आगतम्। वराकाः ते पूर्णोदरम् आहारम् अपि न प्राप्नुवन्ति। शीतकाले पर्याप्तम् आच्छादकम् अपि तेषां पार्श्वे न भवति। दुःखदारिद्र्यपूर्णं जीवनं यापयन्तः असङ्ख्याः भारतीयाः मया स्मृताः। ततः मम मनः अपि दुःखग्रस्तम् अभवत् इति।

## अभ्यासः

1. स्वामी विवेकानन्दः कः आसीत्?
2. 1893 तमे वर्षे विश्वधर्मसम्मेलनं कुत्र अभवत्?
3. अस्मिन् पाठे विवेकानन्दस्य कस्य गुणस्य वर्णनमस्ति?
4. विवेकानन्दः कथं क्रन्दितुम् आरभत?

★★★